# Shri Giridhari Ashtakam

# શ્રીગિરિધાર્યષ્ટકમ્

## Document Information

Text title : giridhAryaShTakam

File name : giridhAryaShTakam.itx

Category : aShTaka, vishhnu, krishna, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : puShTimArgIya stotraratnAkara From stotrArNavaH 05-03

Latest update : May 17, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 11, 2024

*sanskritdocuments.org*

# Shri Giridhari Ashtakam

# શ્રીગિરિધાર્યષ્ટકમ્

ત્રૈલોક્યલક્ષ્મીમદભૃત્સુરેશ્વરો યદા ઘનૈરન્તકરૈર્વવર્ષ ।
તદાકરોદ્યઃ સ્વબલેન રક્ષણં તં ગોપબાલં ગિરિધારિણં વ્રજે ॥ ૧॥

યઃ પાયયન્તીમધિરુહ્ય પૂતનાં સ્તન્યં પપૌ પ્રાણપરાયણઃ શિશુઃ ।
જઘાન વાતાયિતદૈત્યપુઙ્ગવં તં ગોપબાલં ગિરિધારિણં વ્રજે ॥ ૨॥

નન્દવ્રજં યઃ સ્વરુચેન્દિરાલયં ચક્રે દિવીશાં દિવિ મોહવૃદ્ધયે ।
ગોગોપગોપીજનસર્વસૌખ્યકૃત્તં ગોપબાલં ગિરિધારિણં વ્રજે ॥ ૩॥

યં કામદોગ્ઘ્રી ગગનાહૃતૈર્જલૈઃ સ્વજ્ઞાતિરાજ્યે મુદિતાભ્યષિઞ્ચત્ ।
ગોવિન્દનામોત્સવકૃદ્વ્રજૌકસાં તં ગોપબાલં ગિરિધારિણં ભજે ॥ ૪॥

યસ્યાનનાબ્જં વ્રજસુન્દરીજના દિનક્ષયે લોચનષટ્પદૈર્મુદા ।
પિબન્ત્યધીરા વિરહાતુરા ભૃશં તં ગોપબાલં ગિરિધારિણં ભજે ॥ ૫॥

વૃન્દાવને નિર્જરવૃન્દવન્દિતે ગાશ્ચારયન્યઃ કલવેણુનિઃસ્વનઃ ।
ગોપાઙ્ગનાચિત્તવિમોહમન્મથસ્તં ગોપબાલં ગિરિધારિણં ભજે ॥ ૬॥

યઃ સ્વાત્મલીલારસદિત્સયા સતામાવિશ્ચકારાઽગ્નિકુમારવિગ્રહમ્ ।
શ્રીવલ્લભાધ્વાનુસૃતૈકપાલકસ્તં ગોપબાલં ગિરિધારિણં ભજે ॥ ૭॥

ગોપેન્દ્રસૂનોર્ગિરિધારિણોઽષ્ટકં પઠેદિદંયસ્તદનન્યમાનસઃ ।
સમુચ્યતે દુઃખમહાર્ણવાદ્ભૃશં પ્રાપ્નોતિ દાસ્યં ગિરિધારિણે ધ્રુવમ્ ॥ ૮॥

પ્રણમ્ય સમ્પ્રાર્થયતે તવાગ્રતસ્ત્વદઙ્ઘ્રિરેણું રઘુનાથનામકઃ ।
શ્રીવિઠ્ઠલાનુગ્રહલબ્ધસન્મતિસ્તત્પૂરયૈતસ્ય મનોરથાર્ણવમ્ ॥ ૯॥

॥ ઇતિ શ્રીરઘુનાથપ્રભુકૃતં સમાપ્તમિદં શ્રીગિરિરાજધાર્યષ્ટકમ્ ॥

Proofread by PSA Easwaran

*Shri Giridhari Ashtakam*

pdf was typeset on June 11, 2024

Please send corrections to *sanskrit@cheerful.com*